# Shridharatirtha Stuti

# શ્રીધરતીર્થસ્તુતિઃ

## Document Information

Text title : Shridharatirtha Stuti

File name : shrIdharatIrthastutiH.itx

Category : deities_misc, gurudev, shrIdharasvAmI, stuti

Location : doc_deities_misc

Author : bhaginI netrAvatI

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીધરતીર્થસ્તુતિઃ

(ઇન્દ્રવજાવૃત્તમ્)

આદ્યન્ત કાર્યાલય દિવ્ય તીર્થં
    શ્રીધર્મતેજોવલ બુદ્ધિતીર્થમ્ ।
સિદ્ધિર્ગણાનાં ગુણશાન્તિતીર્થં
    શ્રીદં ચ તીર્થં શરણં પ્રપદ્યે ॥ ૧॥

સર્વાન્તરસ્થાનમનન્ત તીર્થં
    સર્વેન્દ્રિયાલકૃત ગુહ્યતીર્થમ્ ।
સ્વાનન્દશોભાઙકુર હાર્દતીર્થં
    ગુરુપાદતીર્થં શરણં પ્રપદ્યે ॥ ૨॥

શ્રીરામવાણીપ્રિય ભાગ્યતીર્થં
    શ્રીરામસીતાઽર્ચન તોષ તીર્થમ્ ।
શ્રીરાજરામાશ્રિત જીવ (પ્રાણ) તીર્થં
    શ્રીદં ચ તીર્થં શરણં પ્રપદ્યે ॥ ૩॥

કારુણ્યરૂપાન્તર સ્વામિતીર્થં
    શ્રીશ્રીધરાખ્યામૃતહસ્તતીર્થમ્ ।
સાક્ષાદગસ્ત્યાશ્રમ ભદ્રતીર્થં
    વરદાપ્રવાહં શરણં પ્રપદ્યે ॥ ૪॥

યાઽણોરણીયાન્તર દેવકન્યા
    યાલિઙ્ગિતા ગીતવતિપ્રસન્ના ।
યા રાષ્ટ્રસ્વર્ગે પરિણીત માન્યા
    તીર્થાઙ્ગના સાધ્વિપદં પ્રપદ્યે ॥ ૫॥

યાઽરણ્યમધ્યે સરિતાસુવારિ
    યા બ્રહ્મસૂત્રે સુવિવાદ વારિ ।
યા જન્મસન્તારયતીતિ વારિ

સા માતૃસાધ્વીં શરણં પ્રપદ્યે ॥ ૬॥

યા મેધયા નિસૃત કર્ણ વારિ
કાર્યસ્ય સઞ્ચાલિનિ ચિત્તવારિ ।
પ્રાક્જન્મપુણ્યં ફલદર્શ વારિ
માતુશ્ચ સાધ્વીં શરણં પ્રપદ્યે ॥ ૭॥

શ્રીપાદમૂલે શ્રુતિકોકિલાખ્યે
વાક્પ્રાણસઙ્ઘે યતિરાજ શેખરે ।
ઝઙ્કારભાગે ઓઙ્કારમન્ત્રં
શ્રીદં ચ તીર્થં શરણં પ્રપદ્યે ॥ ૮॥

સચ્ચિત્કલાશ્રી સરસા સુશબ્દં
વિદ્યાર્થવારી ભુવિ પદ્મ નિસૃતમ્ ।
અધ્યાત્મનિષ્ઠાત્ ગન્તવ્યમાર્ગં
વરદાં પુરાણીં શરણં પ્રપદ્યે ॥ ૯॥

સચ્ચિત્પ્રભાં શ્રીં પ્રણવસ્વરૂપાં
મૃત્યુજયાલઙ્કૃત પાર્વતીં તામ્ ।
આત્માર્થસિધ્યૈઃ રિદ્રસ્યવજ્રા
વૃત્તેન તીર્થં શરણં પ્રપદ્યે ॥ ૧૦॥

યા કાવ્યલક્ષ્મી જગતિ પ્રસિદ્ધા
યા સા કલા વિષ્ણુ, શિવા ચ બ્રહ્મા ।
યા સ્વર્ગભૂમી જય સજ્જનાઙ્ગાઃ
સા તીર્થસાધ્વીં શરણં પ્રપદ્યે ॥ ૧૧॥

સર્વાર્થદાત્રીં જય તીર્થલક્ષ્મીં
કૈલાસતોષાઙ્કુર જીવલક્ષ્મીમ્ ।
ત્રયોદશાખ્યાવલિ પૂર્ણલક્ષ્મીં
ક્ષેત્રં સુપૂજ્યાં શરણં પ્રપદ્યે ॥ ૧૨॥

શ્રીરામનામાન્તર યજ્ઞતીર્થં
સ્વીકૃત્ય ચ ક્ષઃ કરણાદિ કાર્યમ્ ।
શ્રીપાદરાજાર્પણમસ્તુ નિત્યં
સર્વાન્ સતઃ શ્રોચિરચિત્રમીડે ॥ ૧૩॥

ઇતિ ભગિની નેત્રાવતી વિરચિતા શ્રીધરતીર્થસ્તુતિઃ સમાપ્તા ।

(પરમાનન્દ મઠ, શીગેહળળી,
તા. શિરસી (ઉ. કા.))

Proofread by Paresh Panditrao

*Shridharatirtha Stuti*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*